# Tryambakeshvara Mahima Varnanam

# ત્ર્યમ્બકેશ્વરમહિમવર્ણનમ્

## Document Information

Text title : Tryambakeshvara Mahima Varnanam

File name : tryambakeshvaramahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 21| 1-12||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# ત્ર્યમ્બકેશ્વરમહિમવર્ણનમ્

ઈશ્વરઃ -

ત્રિયમ્બકો નામ ગિરિરસ્તિ પ્રિયતમો મમ ।
મન્દરાચ્ચાપિ કૈલાસાત્તથૈવ કનકાચલાત્ ॥ ૧॥

તે નિવાસા મહેશસ્ય ત્રિયમ્બકગિરિસ્ત્વહમ્ ।
ત્રિયમ્બકેશ્વરં નામ્ના તલ્લિઙ્ગં પરમાદ્ભુતમ્ ॥ ૨॥

તલ્લિઙ્ગં યેન દૃષ્ટં સ્યાત્તેન દૃષ્ટા ત્રિલોકિકા ।
ત્રૈલોક્યે યાનિ લિઙ્ગાનિ તાનિ સર્વાણિ શઙ્કરિ ॥ ૩॥

ત્રિયમ્બકેશ્વરં લિઙ્ગં મમ સર્વાર્થસિદ્ધિદમ્ ।
યેન દૃષ્ટં શ્રુતં વાપિ પ્રણતં વા સમર્ચિતમ્ ॥ ૪॥

સ એવ ધન્યધૌરેયઃ પુરુષાર્થૈકભાજનમ્ ।
તત્ર સન્તિ મહાશૈવાસ્ત્ર્યમ્બકેશસમર્ચકાઃ ॥ ૫॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગાઃ ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ।
રુદ્રાક્ષમાલાભરણા રુદ્રસૂક્તજપાદરાઃ ॥ ૬॥

પઞ્ચાક્ષરપરા નિત્યં સદા મલ્લિઙ્ગપૂજકાઃ ।
બહવસ્તત્ર દેવેશિ ત્ર્યમ્બકેશં યજન્તિ મામ્ ॥ ૭॥

બિલ્વપત્રૈશ્ચ કમલેસ્તથા ગોદાવરીજલૈઃ ।
પૂતૈર્માં સ્નાપયન્તીશે રુદ્રમન્ત્રૈરહર્નિશમ્ ॥ ૮॥

ફલમૂલૈશ્ચ વિવિધૈર્નૈવેદ્યૈશ્ચ સદામ્બિકે ।
મત્પૂજારહિતાસ્તે તુ જલમન્નં ફલાદિકમ્ ॥ ૯॥

નાશ્નન્તિ નિયતં દેવિ નૈવેદ્યૈર્વર્તયન્તિ તે ।
ગૌતમાર્થે સમાનીતા સ્વમૌલિસ્થજટાગ્રતઃ ॥ ૧૦॥

પુણ્યા ગોદાવરી દેવિ વૃદ્ધગઙ્ગેતિ વિશ્રુતા ।

તસ્યાં સ્નાત્વા મહાનદ્યાં દૃષ્ટ્વા શ્રીત્ર્યમ્બકેશ્વરમ્ ॥ ૧૧॥

અશ્વમેધશતાત્પુણ્યં ભવિષ્યતિ ન સંશયઃ ॥ ૧૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે ત્ર્યમ્બકેશ્વરમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૧। ૧-૧૨॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 21. 1-12..

Notes:

Shiva tells Gauri about the Tryambakeshwara Jyotirlinga that is located near the origin of River Godavari (aka Vriddha Ganga), that sprang from the dreadlocks of Shiva following prayers of Rishi Gautam.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

*Tryambakeshvara Mahima Varnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*